# Purna Brahma Stotram

# पूर्णब्रह्मस्तोत्रम्

## Document Information

Text title : Purnabrahmastotram Gitam

File name : pUrNabrahmastotramgItam.itx

Category : deities_misc, stotra, aShTaka, sanskritgeet

Location : doc_deities_misc

Author : Krishnadas

Latest update : February 26, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 26, 2025

*sanskritdocuments.org*

# पूर्णब्रह्मस्तोत्रम्

पूर्णचन्द्रमुखं नीलेन्दुरूपं
उद्भाषितं देवं दिव्यंस्वरूपं
पूर्णं त्वं स्वर्णं त्वं वर्णं त्वं देवं
पिता माता बन्धु त्वमेव सर्वं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ १॥

कुञ्चितकेशं च सञ्चितवेशं
वर्तुलस्थूलनयनं ममेशं
पिनाकनीनिका नयनकोशं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ २॥

नीलाचले चञ्चलया सहितं
नन्दनन्दनं त्वं इन्द्रस्य इन्द्रं
जगन्नाथस्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ३॥

सृष्टि स्थिति प्रलय सर्वमूळं
सूक्ष्मातिसुक्ष्मं त्वं स्थूलातिस्थूलं
कान्तिमयानन्तं अन्तिमप्रान्तं
प्रशान्तकुन्तळं ते मूर्त्तिमन्तं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ४॥

यज्ञ तप वेद ज्ञानात् अतीतं
भावप्रेमछन्दे सदावशित्वं
शुद्धात् शुद्धं त्वं च पूर्णात् पूर्णं

कृष्णमेघतुल्यं अमूल्यवर्णं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ५॥

विश्वप्रकाशं सर्वक्लेशनाशं
मन बुद्धि प्राण श्वासप्रश्वासं
मत्स्य कूर्म नृसिंह वामनः त्वं
वराह राम अनन्त अस्तित्वं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ६॥

ध्रुवस्य विष्णुः त्वं भक्तस्य प्राणं
राधापति देव हे आर्त्तत्राणं
सर्व ज्ञान सारं लोक आधारं
भावसञ्चारं अभावसंहारं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ७॥

बलदेव सुभद्रा पार्श्वे स्थितं
सुदर्शन सङ्गे नित्य शोभितं
नमामि नमामि सर्वाङ्गे देवं
हे पूर्णब्रह्म हरि मम सर्वं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ८॥

कृष्णदासहृदि भाव सञ्चारं
सदा कुरु स्वामी तव किङ्करं
तव कृपा विन्दु हि एक सारं
अन्यथा हे नाथ सर्व असारं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहं
जगन्नाथ स्वामी भक्तभावप्रेमी नमाम्यहम् ॥ ९॥

॥ इति श्रीकृष्णदासविरचितं पूर्णब्रह्मस्तोत्रं सम्पूर्णम् ॥

*Purna Brahma Stotram*

pdf was typeset on February 26, 2025

Please send corrections to *sanskrit@cheerful.com*